शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्)

साहित्य-दर्पणः षष्ठः परिच्छेदः

---

दृश्य काव्यस्य रूपकमुख्यस्य अभिनयस्य च लक्षणमभिधाय तद्भेदांश्च प्रदर्श्य रूपकाणि कति उपरूपकाणि च कति ? इति विवेचनम् ।

दृश्य श्रव्यत्व भेदेन काव्यं द्विविधम् । दृश्यं दर्शनीय प्रधानम्, श्रव्यं च श्रोतव्यं मात्रम् । तत्र अभिनय योग्यं काव्यं दृश्यं भवति । तदेव दृश्यं काव्यं नटे रामादि स्वरूपाणाँ आरोपाद् रूपकमुच्यते । उक्तञ्च कलाधरमरन्दे —

'यथा मुखादौ पद्मादेरारोपो रूपकं मतम् ।
तथैव नायकारोपो नटे रूपकमुच्यते ॥' इति

ननु को नामाभिनयः ! अत्र - नटैः रङ्गादिभिः रामयुधिष्ठिरादीनाम् अवस्थानुकरणम् अभिनयः । स च चतुर्विधो भवति - आङ्गिको, वाचिकः आहार्यः, सात्त्विकश्चेति । उक्तं च साहित्य दर्पणे -
'भवेदभिनयोऽवस्थानुकारः स च चतुर्विधः ।
आङ्गिको वाचिकश्चैवमाहार्यः सात्त्विकस्तथा ॥' इति

तत्र अङ्गेन निष्पन्नो आङ्गिकः । वचसा प्रतिपाद्यो वाचिकः, आहार्येण वेष रचनानिष्पाद्य आहार्यः, स्तम्भस्वेदादि निष्पाद्यः सात्त्विकः ।

तच्च दृश्यं काव्यं रूपकोपरूपक भेदेन द्विविधम् । तत्र रूपकं दशविधम् । तद्यथा - नाटकम्, प्रकरणम्, भाणः, व्यायोगः, समवकारः, डिमः, ईहामृगः, अङ्कः, वीथि प्रहसनं चेति । उपरूपकम् च अष्टादश विधम् । तद्यथा - नाटिका, त्रोटकम्, गोष्ठी, सट्टकम्, नाट्यरासकम्, प्रस्थानम्, उल्लाप्यकम्, काव्यं, प्रेङ्खणम्, रासकम्, श्रीगदितम्, शिल्पकम्, विलासिका, दुर्मल्लिका, प्रकरणी, हल्लीशः, भाणिका चेति - दिक् ।

उपेन्द्र झा

5/9/20

स० प्रो० साहित्य

ल० उ० वि० महावि०

कुरसेला, पूर्णियाँ

Sep 5, 2020

शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)
साहित्य दर्पणः दशमः परिच्छेदः

निर्दिष्टालङ्कार लक्षणं निरूप्य काव्ये तस्य किं प्रयोजनम् ! इति प्रतिपादनम् ।

आचार्य विश्वनाथेन एव साहित्य दर्पणस्य दशमे अध्याये काव्ये अलङ्कारस्य प्रयोजनम् एवाञ्च तस्य भेदस्य भूयसी वर्णनं कृतम् । अलङ्क्रियतेऽनेनेति अलङ्कारः । अर्थात् रसादिपुरकत्वे जनकत्वे सति अतिशय शोभातिशायि काव्य धर्मत्वम् अलङ्कारत्वम् । उक्तं च साहित्यदर्पणे-
'शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ।।' इति

यथा अङ्गदादयः शरीरशोभातिशायिनः शरीरिणम् उपकुर्वन्ति तथा काव्ये अनुप्रासोपमादयः अलङ्काराः शब्दार्थ शोभातिशायिनो रसादेरुपकारकाः भवन्ति । अलङ्काराः अस्थिराः इति ने एषां गुणवत् आवश्यकी स्थितिः । अर्थात् - गुणाः अपि रसोत्कर्षकाः भवन्ति , किन्तु ते रसस्य स्थिरा धर्माः स्वरूप विशेषाः सन्ति । अलङ्काराश्च शब्दार्थयोरस्थिरा धर्माः शब्दार्थद्वारेण च रसं उत्कर्षयन्ति । इदमेव एषां प्रयोजनम् यत शब्दार्थद्वारेण रसादेः उपकारकत्वम् ।
अलमतिविस्तरेण ।

---

उपेन्द्र झा
5/9/20
एसो प्रो० साहित्य
रा० उ० सं० महावि०
कुरसेला, पूर्णियाँ